# नाना-छन्दोमय-श्रीनेमिनाथस्तवन

सं. मुनि विमलकीर्तिविजय

संस्कृत-छन्दःशास्त्रना विविध छन्दोनो उपयोग करी, उत्तम अलंकारो तथा हार्दिक भावोथी गुंफित आ स्तवनमां श्रीनेमिनाथ भगवाननी स्तवना करवामां आवी छे. आ स्तवननी विशेषता ए छे के कर्ताए छन्दोनां नामो पण स्तुतिमां ज विविध रीते जोडी दीधां छे अने मुख्यतः अप्रचलित छन्दोनो ज उपयोग कर्यो छे जे तेमनी भाषा, छन्दःसाहित्य तथा काव्यविषयक कुशलता दर्शावे छे.

आ स्तवनमां कर्ताए मात्रावृत्त तथा वर्णवृत्त-एम बंने प्रकारना छन्दो वापर्या छे. जो के मात्रावृत्त छन्दो ओछा वापर्या छे. जेम के - पथ्यावक्त्र (श्लो.१), औपच्छन्दसक (श्लो. ४), आपातलिका अपरान्तिका (श्लो. ७) अने औपच्छन्दसक-अपरान्तिका (श्लो. ११). बाकीना श्लोको वर्णवृत्त-छन्दोमां ज रच्या छे. तेमां पण ४२मा श्लोकना चार चरणमां चार जुदा छन्दो प्रयोजी कमाल करी दीधी छे.

आ स्तवन एक ज पत्रमां लखायेलुं छे. अक्षरो अत्यंत सुन्दर-स्पष्ट तथा मरोडदार छे. सहेज-साज अशुद्धि रही गई छे. कर्ता तथा लेखन संवत् विशे कोई उल्लेख नथी. छतां लखावट जोतां प्रायः १६मा सैकामां लखाई होय तेवुं अनुमान थई शके छे. छेल्ला श्लोकमां **लक्ष्मी**-छन्द वापर्यो छे. ते परथी एवुं अनुमानी शकाय के कोई लक्ष्मीकल्याण-लक्ष्मीकल्लोल जेवुं लक्ष्मी-युक्त नाम धरावतां मुनिए आ स्तवननी रचना करी होय.

अहीं छन्दोनां नामो हेमचन्द्राचार्यविरचित 'छन्दोनुशासन'ना आधारे आपवामां आव्यां छे. आ संपादनमां मुनि कल्याणकीर्तिविजयजीए सहाय करी छे.

★★★

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीशैवेयं शिवश्रीदं, छन्दोभिः कैश्चिदप्यहम् ।
[1]कंदर्पविजयप्राप्तास्तोक-लोकश्रियं स्तुवे ॥१॥ (पथ्यावक्त्र)

नभोगनगस्वरूपाणी (नमो **नगस्वरूपिणी**) रिता त्वयि प्रयातु मे ।
महत्त्वमम्बुदालिवत्तनुप्रमाणा (प्रमाणिका)ऽपि गीः ॥२॥
(नगस्वरूपिणी / प्रमाणिका)

मेघश्यामश्रीमन्नेमे ! **विद्युन्मालावन्मां** मुक्त्वा ।
का ते शोभा भूभृच्छृङ्गे, राजीमत्येत्युक्तो जीयाः ॥३॥ (विद्युन्माला)

वैतालीयं यथा गुरौ स्या**दौपच्छन्दसकं** श्रितेऽक्षरेऽग्रे ।
अपि मिथ्यादृग् तथा सुदृग् स्यात्त्वदुत(क्त)तत्त्वे संश्रिते जिनेन्द्र ॥४॥
(औपच्छन्दसकम्)

**वक्त्र**सुधाभीशु(षु)स्तेऽधीश ! स्फीतमुदे नो नव्यः कस्य ।
यः सततं निर्दोषासङ्गस्त्यक्तकलङ्कः पद्मोल्लासी ॥५॥ (वक्त्र)

किल सकलां मुखलक्ष्मीं, जिन ! जयिनीं तव वीक्ष्य ।
भजति भिया **शशिलेखा**, गुरुगिरिशालिकदुर्गम् ॥६॥ (शशिलेखा)

तव पादैः श्रितसर्वसमत्वैर्धरयाऽऽधिक्यमवापि दिवाऽपि ।
**आपातिलका ( आपातलिका )**तोऽधिकला किं तैरपा **( रपरा )न्तिक**येश !
न लेभे ॥७॥ (आपातलिका - अपरान्तिका)

भिन्दत्य**ुद्धत**मोहतमिस्रं, गोभिर्भासितविष्टपभावे ।
स्वामिंस्तेऽभ्युदितेऽपि मुखेन्दौ, चित्रं शोषमियर्त्ति भवाब्धिः ॥८॥ (उद्धत)

**रुक्मवतीश** ! क्षमाभृति शक्रैर्जन्ममहे ते **चम्पकमाला** ।
न्यासि मुदा कण्ठे त्रिदशस्त्रीलोचनभृङ्गस्मेरितमोदाः ॥९॥
(रुक्मवती / चम्पकमाला)

---

१. पाठांतरम् - स्तुत्वा कुर्वे गिरस्तथ्या, पथ्या वक्त्रविनिर्गताः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गन्धर्वैस्तव सुस्त(स्व)रैर्यशोगीतं पीतमवीतसुस्पृहैः ।
स्वामिन्निर्जितशीतरुक्सुधा, गङ्गा**शुद्धविराट्** सुराधिपैः ॥१०॥ (शुद्धविराट्)

मात्राणामिव तन्वता त्वयाऽष्टादशकं ब्रह्मभिदां पदे पदेऽर्हन् ।
**औपच्छन्दसकापरान्तिका**वद्, यतिगणवृत्तविदाऽऽरचि व्रतश्रीः ॥११॥
(औपच्छन्दसकापरान्तिका)

चूर्णीभवन्त्यङ्गभृतामघौघाः काठिन्यवन्तोऽपि तव स्तवेन ।
स्वामिन्नतामर्त्यनरे**न्द्रवज्रा**घातेन शैला इव निर्विलम्बम् ॥१२॥ (इन्द्रवज्रा)

**उपेन्द्रवज्रा**युधपन्नगेन्द्रैरुपासितस्त्वं स्मितकैरवाक्षैः ।
सदास्यशीतद्युतिचन्द्रिकाम्भः पिपासुभिर्नाथ ! निरन्तरायम् ॥१३॥
(उपेन्द्रवज्रा)

आख्यानि कीदृग् निजदुःखजातं, तवाऽग्रतोऽहं व्यथका यदेते ।
मुञ्चन्ति नाऽद्यो**प्युपजाति**भृङ्गाः, इव प्रभो ! मां मलिना अघौघाः ॥१४॥
(उपजाति)

**दोधक**मुख्यसुवृत्तनिबद्धै रासशतै रसवद्भिरधीश ! ।
निर्जरनागनभश्चरनार्यः कुत्र जगुर्न भवत्सुभगत्वम् ॥१५॥ (दोधक)

स्वःस्त्रीकुलमुज्ज्वलनाट्यरसात् साक्षिभ्रमिसन्मुख**मोटनकम्** ।
नानाकरणोद्भटमपाहरच्चित्तं(?) न तवेश ! रतीशजितः ॥१६॥ (मोटनक)

कामं स्वामिंस्त्वदमलचलनाम्भोजस्फूर्जद्**भ्रमरविलसिताः** ।
मर्त्याः प्रापुः प्रमुदितमनसः, कल्याणश्रीरसमसमतरम् ॥१७॥ (भ्रमरविलसित)

पादाम्भोजं पुण्यसौरभ्यलोभासङ्गिस्वर्गश्रेणिभृङ्गावलीकम् ।
सद्भावाम्भः **शालिनी**श ! त्वदीयं, वासं शश्वन्मानसे मे वितन्यात् ॥१८॥
(शालिनी)

नाथ ! विष्टपकृपाऽ**परान्तिका** यात विश्वमहिता पदद्वयी ।
पूरिताखिलमनो**रथोद्धता**नन्ततापशमनाय मेऽस्तु ते ॥१९॥
(अपरान्तिका - रथोद्धता)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**यैस्तव** स्तवनकर्मणि वाणी, **स्वागता**धततिभिर्विनियुक्ता ।
ते भवन्ति भवनाधिपतित्वं, प्राप्य नाथ ! जगति स्तवनीयाः ॥२०॥ (स्वागता)

भवदा ददतां **प्रबोधितां** ध्वनिना दत्तहरित्प्रतिश्रुताम् ।
अमृतप्रदकेन निन्यिरे, मुदिरेणेव रयेण विस्मयम् ॥२१॥ (प्रबोधिता)

मुक्ताफलेन जिनेन्द्र ! यादवक्षो**णीन्द्रवंश**ाग्रमलंकरिष्णुना ।
निस्त्रासनैर्मल्यवता कृतस्त्वया, कस्को न दृग् मार्ग[य]ते न मोदभाग् ॥२२॥
(इन्द्रवंशामिश्र-उपजाति)

चलन्महीरत्नमयध्वजां चलच्छलान्नरीनर्ति जगत्पते ! तव ।
यशस्ततिर्विष्टपदिष्टविस्मया, सुतुङ्ग**वंशस्थ**नटीव सर्वदा ॥२३॥ (वंशस्थ)

भक्तिसस्पर्धवर्धिष्णुसत्संमदा, नाथ ! जज्ञे जनालीनमन्मौलिका ।
तावकीनाङ्घ्रिपद्माग्रजाग्रन्नखप्रोन्मिष ज्ज्योतिषां श्रेणिभिः **स्त्रग्विणी** ॥२४॥
(स्त्रग्विणी)

**द्रुतविलम्बित**भावविवर्जिता, सकलजन्तुहिता गतमत्सरा ।
जयतु ते युगपज्जनकोटिहृत्प्रभवसंशय[सं]हरिणीश ! वाक् ॥२५॥
(द्रुतविलम्बित)

वरजाङ्गुलीव जिन ! यच्छ्रुतिषु, **प्रमिताक्षरा**ऽपि तव गीरविशत् ।
तरसा ततोऽनशदशेषमपि, स्फुटदर्पदर्पकमहाहिविषम् ॥२६॥ (प्रमिताक्षरा)

प्रिय ! भूषय मां भव माऽभिमुखः, **पारितोऽट कलंकय** मा स्वबलम् ।
इतिवाक्यमिदं श्रवणेऽप्यवहन्नवधीश ! रयाद्भवता मदनः ॥२७॥ (तोटक)

नरेन्द्रान्वयोद्भूतनिर्धूतदोषप्रभूतप्रभावप्रभो ! सत्कलाब्धे ! ।
विदर्पीकृतोद्यन्मनोभू**भुजङ्ग** !, **प्रयातं** शिवं कैर्न हित्वा नमद्भिः॥
(भुजङ्गप्रयात)

प्रमुदितवदनाः **प्रभा**भासुराः प्रणयभरभृताः सुपर्वाङ्गनाः ।
भवति नतिकृतां जनानां विभो ! वदति दिवि सदाशिषः शंपुषः ॥२९॥ (प्रभा)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वामिन् ! मूर्तिर्**जलधरमाला**वत्ते, कामं श्यामा रचयति तपो(वो)पास्तिम् ।
आतन्वाना सुकृतलताविस्तारं, तच्चित्रं यज्जनयति हंसानन्दम् ॥३०॥
(जलधरमाला)

स्थाने तन्मत्यै यदि दोषाकरः स्यान्मिथ्याबुद्धि श्राग् **वैश्वदेवी**मवाप्य ।
तच्चित्रं मैत्रीमाप्य भास्वानपि त्वं, जन्तूनां धत्से नाथ ! यत्सिद्धियोगम् ॥३१॥
(वैश्वदेवी)

**जलोद्धगतिः** कृताऽघविततिस्त्वदुक्तविरतिः कुसंगतिरतिः ।
प्रनष्टसुमतिर्जिनेश ! कुमतिर्जनः शिवगतिश्रियं न भजति ॥३२॥ (जलोद्धतगति)

लभते स्तुवन् केकिरवं जयद्भिर्दुरितपुटविभेदिन् मञ्जुशब्दैः ।
तव पद**तामरसं** भुवि भव्यः, कुसुमविचित्रावलिभिरिहाऽर्चाम् ॥३३॥ (तामरस)

सत्कीर्तिकान्तिललितास्तपूर्णिमा चन्द्रवर्त्मसुगतेर्भुवि भविनाम् ।
विशति नाथ ! तव गीः **प्रियम्वदा**, स्वरविनिर्जितलसत्कलहंसा ॥३४॥
(प्रियम्वदा)

भगवन् ! **गुणमालभारिणी**नां, निजमाधुर्यपराजितामृतानाम् ।
द्रुतविद्रुतवैरसंशयानां, न गिरां ते श्रवणं वितन्वते के ॥३५॥ (मालभारिणी)

अत्यन्तं मधुरिमकान्तिसौकुमार्यौदार्यौजोद्धुतसमताप्रसत्तिवन्ति ।
काव्यानि श्रवणवदीश ! ते निपीयाङ्गानि श्रान्मम नयने **प्रहर्षिणी** स्तम् ॥३६॥
(प्रहर्षिणी)

मूर्च्छत्पाथोवाहमहागर्जितनादैर्नित्यं नृत्यन्मञ्जुरवन्**मत्तमयूरम्** ।
शैलं कीर्तिस्ते विकसत्केतकराजीवातिस्फीता रैवतकं वासयतीश ! ॥३७॥
(मत्तमयूर)

मदनं विजेतुं किमिमं महाकरं, गिरिकुञ्जरं गैरिगनागजाञ्चितम् ।
श्रितवान् **सुदन्तं** गुरुपादसुंदरं, त्वामिनश्रवन्निर्झरदानसंवरम् ॥३८॥ (सुदन्त)

नृपकन्यकाऽक्षिहृदयाभिनन्दिनी, सपदि त्वयौज्झि मृदु**मञ्जुभाषिणी** ।
निजरूपनिर्जितसुराङ्गनाऽपि सा, जिन ! नित्यनिर्वृतिसुखाभिलाषिणा ॥[२९॥
(मञ्जुभाषिणी)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुटिलगति**करं तं जगद् व्यस्मरं, मदनविषधरं निर्विषत्वं न यत् ।
त्वमसि यदि जिन ! स्वर्णकायस्तदा, मरकतमणिवत् कृष्णकायः कथम् ॥४०॥
(कुटिलगति)

तृणवद्दिवं दिविषदो गणयन्तस्त्वदुपान्तमीश्वर ! मुदाऽधिवसन्ति ।
स्मितकेतकीकमपहाय वनं किं मधुपाः स्फुटं **कुटज**राजि भजन्ति ॥४१॥
(कुटज)

न ते ध्यानध्वंसं **चन्द्रिणी** चन्द्रकान्तं, व्यधित नाथाङ्गहाराद्भुताऽ**प्युर्वशी** ।
तथा वनी शुचि**रुचिरा**प्रमञ्जरी, गुञ्जत्पिकोन्मदमधुप ! **प्रभावती** ॥४२॥
(चन्द्रिणी-उर्वशी-रुचिरा-प्रभावती)

शमयति झगिति श्रमं समन्ताद् ध्वनरसलब्धविवृद्धिरीश ! गीस्ते ।
अभिमतफलदायिनी जनानां त्रिदिवलते ! वरदांशु**पुष्पिताग्रा** ॥४३॥
(पुष्पिताग्रा)

शमयत् परं गुरुतमांसि, कुवलयविबोधनोद्धुराः ।
गाव इह ननु जडत्वभृतो भगवंस्तवाऽऽननसुधाकरो**द्गताः** ॥४४॥ (उद्गता)

श्रीमन्नेमीश्वरेति स्तूयसे द्वैतशोभः, सोत्साहं छन्दसां यैर्मङ्गिभिस्त्वं शिवासूः ।
मर्त्यैः संप्राप्यते तैः क्लृप्तदुःकर्मपूर- प्रध्वंसैर्मोक्ष**लक्ष्मी**सङ्गसौख्यं महीयः
॥४५॥ (लक्ष्मी)

इति नानाछन्दोमयश्रीनेमिनाथस्तवनं समाप्तम् ॥

C/o. अतुल कापडिया,
ए-९, जागृति फ्लेट्स,
पालडी, अमदावाद-३८०००७ (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org